International Journal of Sanskrit Research 2024; 10(4): 37-40

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 37-40
© 2024 IJSR
www.anantaajournal.com
Received: 18-04-2024
Accepted: 20-05-2024

**तपस्विनी खटुआ**
पीएच.ण्डी. विद्वान, सर्वदर्शन, एसजेएसयू, पुरी, ओडिशा, भारत

**Corresponding Author:**
**तपस्विनी खटुआ**
पीएच.ण्डी. विद्वान, सर्वदर्शन, एसजेएसयू, पुरी, ओडिशा, भारत

# शुद्धाद्वैतवेदान्ते जीवस्य प्रकारभेदविचारः

**तपस्विनी खटुआ**

## प्रस्तावना

> **"चैतन्यलक्षणो जीवो ब्रह्माशोऽणुरेव च ।**
> **सुखदुःखसमुद्धात शरीरेवाप्य तिष्ठति ॥"**

उपर्य्युक्तेन श्लोकेन जीवाणुरूपब्रह्मंशः सुखोदुःखोपलब्धिरूप शरीरे व्यापकत्वेन तिष्ठति इति । प्रमेयारत्नार्णवकारेण श्रीमता वालकृष्णभट्टेन जीवस्य प्रकारभेदविषये पर्य्यालोच्यते । अस्यमते जीवस्य अवस्थात्रयं विद्यते यथा - शुद्धजीव-संसारी-जीव-मुक्तजीवश्चेति । जाग्रतस्वप्नसुषुप्तिरूपावस्थात्रयवान् जीव इति अद्वैतीनामतम् । यदुक्तं संग्रहकारेण –

> कालत्रये ज्ञातृकाले प्रतीतिसमये तथा
> वाधाभावात्पदार्थानां सत्त्वत्रैविध्यमिष्यतते ॥
> तात्त्विकं ब्रह्मणः सत्त्वं व्योमादेर्व्यावहारिकम् ।
> रुप्यादेरथजातस्य प्रातिभासिकमिष्यते ॥
> लौकिकेन प्रमाणेन यद्वाध्यं लौकिकऽवधौ ।
> तत्प्रातिभासिकं सत्त्वं वाध्यं सत्येव मातरि ॥
> वैदिकेन प्रमाणेन यद्वाध्यं वैदिकेऽवधौ।
> तद्व्यावहारिकं सत्त्वं बाध्यं मात्रा सहैव तत् ॥[1]

जीवब्रह्मणो एकत्वनिरूपणमद्वैतसम्मतत्वम् । परन्तु जगज्जीवब्रह्मणामद्वयत्वं शुद्धाद्वैतस्य सिद्धान्तः । प्रथमं शुद्धं-संसारि-मुक्तभेदात् जीवस्य त्रैविध्यमङ्गीकृतम् ।

## शुद्धजीवस्वरूपम्

> बालकृष्णभट्टानुसारेण शुद्धजीवस्याविर्भावः कारणभूतादक्षरब्रह्मणः सकाशाद् सिद्ध्यति । यथा -
> द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
> क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
> उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
> यो लौकत्रयमाविश्य विभर्त्त्यव्यय ईश्वरः ॥
> यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
> अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥[2] इति
> न केवलं गीतास्मृतौ अक्षरपुरुषात् जीवस्याविर्भावः श्रुयते ॥[3]

कारणभूतादक्षरब्रह्मणो जीवस्याविर्भावं प्रतिपादयति वृहदारण्यकश्रुतिः । "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति"[4] इति । तथा सच्चिदानन्दात्मकात् परस्मात् ब्रह्मण जीवा आविर्भवन्ति ।व्युच्चरणान्तरं कारणरुपाक्षरगतस्य भगवतः 'विशुद्धसत्त्वं तव धाम शान्तम्[5] इत्यादि प्रमाणसिद्धस्य भगवद्धर्मात्कस्य विशुद्धसत्त्वस्य जीवस्याविर्भावः अशंभूतेन तादृकसत्वेन भगवदिच्छाद्वारेण प्रवलीकृतेन आनन्दांशतिरोहितेनभवति इति सिद्धान्तः ।

तदा निरुपाधिकोऽणुरुपोऽक्षरांशः चित्प्रधानः तिरोहितानन्दो जीवशब्दवाच्यो भवति। "विशुद्धसत्त्वं तव धाम शान्तम्" इत्यत्र शंकाभवति किं नाम विशुद्धसत्वम् ? उच्यते शुद्धं रजस्तमोभ्यामसपृक्तविशेषेण शुद्धसत्त्वेनाप्यसंपृक्तं तत् तव धाम स्थानं "सत्त्वं विशुद्धं वासुदेवशब्दितम्"[6] इति स्मर्यमाणत्वात्। किञ्च धाम तेजोऽपि सात्त्विकमेव, भगवत्तेजः विशुद्धपदस्य सत्त्वमेव वाच्यं भवति । किञ्च इदं सत्त्वं शुद्धसत्त्वान्तरेणाप्यमिश्रितं तज्जीवस्थं नियतं भवति, अत इदं सत्त्वं परमकाष्ठापन्नमेव, तदाह शान्तम् इति । अतः शान्तिरेव परमकाष्ठा[7] इति आत्मा नोत्पद्यते, न विनश्यति । परन्तु दृश्यते शरीरेण साकं तस्योपस्थितिः । अग्निस्फुलिङ्गवत् परमात्मनः अंशरूपोऽयं जीव इति वल्लभेन अणुभाष्ये प्रतिपादितम्।[8] श्रीमद्भगवद्गीतायां भगवताश्रीकृष्णेन जीवस्य नित्यत्वविषयेऽपि उक्तं भगवद्गीतासु –

**न जायते म्रियते वा कदाचित्**
**नायंभूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो**
**न हन्यते हत्यमाने शरीरे॥[9]**

श्रीमद्भागवतस्य वेदस्तुतिप्रकरणे एतत् प्रतिपादितम्। तद्यथा -

**स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं,**
**तव पुरुषं वदन्त्यखिलेशक्तिधृतीऽशकृतम्।**
**इति नृगतिं विविच्य कवयो निगमावपनं**
**भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः॥[10]**

अस्य श्लोकस्य तात्पर्यं यत् शरीरे जीवो निवसति। तदेव शरीरं कर्मफलभोगार्थं प्राप्तम्। प्रकृतिगतगुणास्तत्र सर्वं साधयन्ति । तत्त्वज्ञानिनः स्वीकुर्वन्ति यत् परमात्मनः अंशस्वरुपोऽयं जीवः।
अत श्रुतिः प्रतिपादयति 'सर्वं खल्विदं ब्रह्म'[11] इति ।भागवतेऽपि निरुपितोऽस्ति तद्यथा-

**यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा।**
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः॥[12]

उपर्युक्तश्रीमद्भागवतीयश्लोकस्यास्य अयमेव आशयः यत्किमपि यत्र कुत्रापि वा संघटते तत् सर्वं भगवतः प्रेरणया सम्पाद्यते एव । अतो व्युचरणे सति आनन्दांशतिरोधानाज्जीवत्वम् । व्युञ्चरणोत्तरम्, आनन्दांशतिरोधाने सति अविद्यासम्वन्धपूर्ववर्तिन्यामवस्थायां शुद्धजीव इति व्यवहारः । लक्ष्मीतन्त्रे शुद्धसत्त्वव्यवस्थितिरिति उच्यते। जीवे शुद्धत्वं तू अविद्यासम्बन्धराहित्यम्।

**संसारी जीवः**

बल्लभाचार्येण संसारिजीवस्य स्वरूपं प्रतिपादितं यत् - ब्रह्मण आनन्दांशः तिरोधानानन्तरमविद्यावशात् मायायाः संसर्गेण ऐश्वर्यादि-धर्मोऽपि तिरोधत्ते। तेन स संसारी जीव इति उच्यते। सूत्रकारेण वादरायणव्यासेन तत्त्वसूत्रे एतत् स्पष्टीकृतं यत् - "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" । इति । अणुभाष्ये भाष्यकारेण स्पष्टीकृतम् यत् - ईश्वरेच्छया जीवात्मनि ऐश्वर्यादिगुणास्तिरोहिता भवन्ति, येन जीवात्मा मोहरुपपरिणामेन जागतिकभोगवाञ्छां प्रकाशयति । दुःखं च प्राप्नोति । अस्य जीवस्यैश्वर्यादिकं यत् रोहितं, तत्र हेतुः पराभिध्यानम्, परस्य भगवतो अभिधानात् नाम इच्छातः भोगेच्छा सम्पद्यते । तस्मादीश्वरेच्छया, जीवस्य भगवद्धर्मतिरोभावः। एश्वर्यतिरोभावाद्दीनत्वं पराधीनत्वं च तस्य।[13] एश्वर्यादिगुणानां तिरोभावेन जीवस्य बन्धनमुत्पद्यते । एवं च ज्ञानवैराग्ययोस्तिरोभावात् विपर्ययोऽपि जायेत । संसारीजीवेषु केषुचिद् रमणेच्छया वहुभवनस्य सिद्धये उच्चभावेच्छा विषयीभूतं मुक्त्यधिकारित्वं सूक्ष्मसद्वासनाविशिष्टं द्वैवत्वं सम्पादयति भगवान् । ते दैवजीवाः मुक्तियोग्याः भवन्ति ।[14] तदा असौ बद्धजीव दैवजीवत्वं प्राप्नोति । भगवताश्रीकृष्णेन श्रीमद्भगवद्गीतायां एतत् समर्थीतम् । तद्यथा 'द्वैवीसंपद् विमोक्षाय'[15] नाम फलकामनाविहिनः सात्त्विकक्रियाविशेषेस्तद्वारा सत्त्वशुद्धिद्वारेण भगवद्भक्त्या स्वस्वरूपावगतिः स्यात्। अज्ञानं नश्यति, कैवल्यं च प्राप्नोति जीवः। यदुक्तं श्रीमद्भागवते बन्धोऽस्याविद्ययानादि -

**एकस्यैव ममांशस्य जीवस्यैव महामते।**
**बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः॥[16] इति।**

पञ्चपर्वात्मिकया अविद्यया जीवस्य बन्धेनं संसारीत्वेन । देहेन्द्रियप्राणाऽन्तःकरणप्राणाध्यासा स्वरूपविस्मृत्याख्यानि पञ्चपर्वाणि तानि च । अनादित्वं तु कार्यान्तरापेक्षया, अमरेष्वमरत्ववत् । एवं प्रतिपादितोऽस्ति विद्वन्मण्डनशास्त्रे यत् तच्छक्त्या-विद्यया जीवः संसारी उच्यते ।[17] अर्थात् जीवस्य अहन्ताममतात्मकसंसारित्वं भगवतः अविद्याशक्त्या सम्पद्यते । भगवतः अविद्याशक्तिः मायाशक्ते पृथकरूपा इति भागवते प्रतिपादितोऽस्ति। तद्यथा –

**श्रीया पुष्ट्या गिरा कान्त्या**
**कीर्त्या तुष्ट्येलयोर्जया।**
**विद्ययाविद्या शक्त्या**
**मायया च निषेवितम॥[18] इति।**

निष्कर्षेणोच्यते यत् - शक्त्या अविद्यया जीवस्य संसारीत्वं, सिद्ध्यति अभिमत्यात्मकत्वात्।

❖ **मुक्तजीवः**

बालकृष्णभट्टेन मुक्तजीवस्य स्वरूपं प्रतिपादितं यत् -
ततः सूक्ष्म-स्थूल-देहसम्वन्धात् संसारधर्मासक्तः सन् जन्ममरणादीननुभवन् भगवत्कृपया सत्सङ्गादिकं लब्धा पञ्चपर्वात्मिकां विद्यां प्राप्य परमानन्दलक्षणां मुक्तिं लभते। यदुक्तं वल्लभाचार्येण –

**वैराग्यं सांख्य योगौ च तपो भक्तिश्च केशवे।**
**पञ्चपर्वेति विद्येयं, यया विद्वान् हरिं विशेत्॥[19]**

अर्थात् उपर्य्युक्तेन श्लोकेन तेन प्रतिपादितं यत् -वैराग्यं-सांख्यं-योग-तप भगवद्भक्तिरुपा पञ्चपर्वात्मिका विद्या तत्त्वज्ञानाय भवति कारणम्। आदौ वैराग्यम्। येन जीवस्य विषयवैतृष्ण्यमुत्पद्यते । ततो सांख्येन प्रकृतिपुरुषभेदज्ञानपूर्वकं नित्यानित्यवस्तुविवेकः सम्पद्यते। अनन्तरमष्टाङ्ग योगः। येन चित्तवृत्तीनां निरोधः स्यात्। अनन्तरं तपसा अशुद्धिक्षये मनसि भगवद्भक्तिः समुदेति। यदुक्तं गीतार्थसंग्रहे-

**कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनम्।**
**ज्ञानयोगार्जितस्वान्तैः परिशुद्धाऽमनि स्थितिः॥**
**भक्तियोगपरैकान्तप्रीत्या ध्यानादिषु स्थितिः।**
**त्रयाणामपि योगानां त्रिभिरन्यस्य संगमः॥ इति॥**

ततः अष्टाङ्गयोगः। ततो निरन्तरंभावनारूपा परमप्रेमाख्या श्रीकृष्णभक्तिसमुदेति।[20] पाञ्चपर्वात्मिकाया विद्यायारभावे संसारीसंज्ञा । विद्याप्राप्त्यनन्तरं मुक्तजीव इति शास्त्रीयविचारः । मुक्तजीवस्य द्विप्रकारत्वं ग्रन्थकारेण निरूपितम् । जीवन्मुक्तः मुक्तश्चेति । तत्र सनकादयो गताविद्याः जीवन्मुक्ता उच्यन्ते । ये तु व्यापिवैकुण्ठेतरभगवल्लोकवासिनस्ते मुक्ता इत्युच्यन्ते । बल्लभाचार्येण तत्त्वार्थदीपनिवन्धे प्रतिपादितम् यथा –

**आनन्दांशप्रकाशाद्धि ब्रह्मभावो भविष्यति।**
**सायुज्यं वान्यथा तस्मिन् उभयं हरिसेवया॥**

भगवदभक्तस्य कृते भगवदीच्छया आनन्दांशः प्रकटितो भवति। तदा परमा मुक्तिर्नाम ब्रह्मभावः हरिसेवयैव भवति नान्यसेवया ।[21] अत्र मुक्ते प्रकारचतुष्टयं स्वीकृतम् । एहिकी जीवन्मुक्तिः. परलौकिकी दिव्यलोकेषु स्थितिः, परामुक्तिः,

नित्यलीलाप्रवेशश्चेति।[22] मुक्तिचतुष्टयेषु अन्तिमः नित्यलीलाप्रवेशात्मिकामुक्तिस्तु मोक्ष रूपा एव। प्रमेयरत्नार्णवे एवमुच्यते यत् - केचिद् उत्तमा दैवास्तु सत्सङ्गादिकं प्राप्य मार्गरुचि-जन्य-श्रवणादि-समुद्भूत स्वतन्त्रभक्त्या फलरूपया नित्यलीलायां प्रविशन्ति । स तेषां मोक्षः । ते पुष्टिमार्गीया जीवाः । बालकृष्णभट्टेन शुद्ध-संसारीजीव-मुक्तजीवश्चेति जीवस्य त्रैविध्यनिरुपणानन्तरं पुनरपि जीवस्य प्रकारद्वयं स्वीकरोति । यथा - दैवजीव आसुरजीव भेदात् । दैवजीवापि द्विविधा भवन्ति । मर्यादामार्गीया, पुष्टिमार्गीयाश्चेति।

**(क) मर्यादामार्गीयजीवः**

मर्यादामार्गीया जीवाः ज्ञान-भक्ति-कर्मयोगादिभिः सच्छास्त्रप्रतिपादितैर्यथायथं मार्गैः भगवन्तं प्राप्नुवन्ति। एतेषां भक्ति ज्ञानप्राधाना एव। एते वेदोक्तनियमान् परिपालयन्ति। तदाधारेण फलकामनापूर्वकं कर्म कुर्वन्ति। यज्ञादिसंसाधनैः अक्षरब्रह्म प्राप्नुवन्ति च। यदुक्तं गीतोपनिषत्सु –

**तद्बुद्ध्यायस्तदात्मानः तन्निष्टास्तत्परायणाः**
**गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥**

**(ख) पुष्टिमार्गीयजीवः**

पुष्टिमार्गीय जीवः केवलं भगवदनुग्रहे अस्थां प्रकटयति । वल्लभाचार्येण पुष्टिप्रवाहमर्यदानिरुपणे ग्रन्थे प्रतिपादितम् यत् - "तस्माज्जीवाः पुष्टिमार्गे भिन्ना एव न संशय" इति ।[23] पुष्टिमार्गीय - मर्यदामार्गीय जीवाणां भेदकस्तु वीजरूपो निरुपाधिको भावः, स च भगवता अविद्यासम्वन्धात् पूर्वं दैवत्वसम्पादनानन्तरं मर्यदामार्गीय जीवेभ्यो भेत्तुं विशेषानुग्रहेच्छया पुष्टिमार्गीयफलं प्रापयिष्यामि इत्येवं संकल्पितम्। वल्लभानुसारेण मर्य्यादापुष्टिमार्गयोः सर्वथा भेद एव स्वीक्रियते। 'अत एवेतरौ भिन्नौ सान्तो मोक्षप्रवेशतः।'[24] श्रीमद्भगवद्गीतासु प्रतिपादितोऽस्ति यत् तेषां भगवता आसुरजीवानां संसारे आसुरीयोन्याम् अशुभाः प्रवृत्तयः परमात्मना एव प्रक्षिप्ताः सन्ति।

**तानहं द्विषतः क्रुरान् संसारेषु नराधमान्**
**क्षिपाम्यजस्त्रमशुभान् आसुरीष्वेव योनिषु।**
**आसुरी योनिमापन्ना मूढा जन्मनि जन्मनि ॥[25]**
**मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥[26]**

ये प्रवाहमार्गोया जीवास्ते सर्वदा भगवति द्वेषभावनया अनुरागं परित्यजन्ति, अत संसारप्रित्या कामनावशेन ते यद्यपि पूजयन्ति भगवन्तं तथापि भगवदनुग्रहं न प्राप्नुवन्ति । अतएव संसारदशायां दुःखभागीनस्ते निवसन्ति । मर्यदामार्गीयजीवानां मुक्तिः अक्षरब्रह्मप्राप्तिद्वारेण स्वीक्रियते। पुष्टिमार्गीयाणां तु पुरुषोत्तमस्वरूपावगतिः।

**भक्त्या मामभिजानाति यावन्त्यश्चास्मि तत्त्वतः।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमत् ॥[27]**

अर्थात् अत्यन्तभक्त्या पुष्टिमार्गीयजीवः भगवतः स्वरूपं ज्ञात्वा आत्मानं कृतार्थीकरोति। सत्यज्ञानानन्दांत्मके ब्रह्मणि प्रविश्य पुष्टिमार्गीयजीवः मुक्तिं लभते।

**आसूर-जीव**

आसुरजीवस्य स्वरूपं प्रतिपादयति वालकृष्णभट्टः यत् - ये तु दैवजीवेभ्यो व्यतिरिक्ता तेषां षड्गुणतिरोधानानन्तरम् अविद्यासम्वन्धे सति नीचभावेच्छा । विषयीभूतं मुक्तिप्रतिबन्धकम् असद्वासनाविशिष्टमासूरत्वं सम्पादयति भगवान्, तदा ते आसुरजीवा उच्यन्ते । ईश्वरेच्छया जीवस्य भगवद्धर्माणां तिरोभावः सम्पद्यते । ऐश्वर्यतिशोभावात् हीनत्वं नाम अविद्यापराधीनत्वं, वीर्यतिरो भावात् सर्वदुःखसहनम्, यशस्तिरोभावात् जन्मादिसर्वापद्विषयत्वम्, ज्ञानतिरोभावाद्देहादिष्वहं बुद्धिः, वैराग्यतिरोभावाद्विषयासक्तिश्च समापद्यते । अतः ते हि जीवाः असद्वासनावशात् तादृशं स्थूलदेहं प्राप्य निन्दितकर्मनिरताः सन्तो नीचयोनिगाः भवन्ति।[28]

बालकृष्णभट्टेन आसुरजीवानां सांसारगतिः वर्णिता । एते आसुरजीवाः असद्वासनाभिः जन्म-मरणचक्रे निपतिताः स्वस्य भगवद्दासस्वरूपत्वं विस्मरन्ति।

गीताप्रतिपाद्यनिष्कर्षाधारेण एते आसुरजीवाः निकृष्टतमगतिं प्राप्नुवन्ति । तेषां आसूरजीवानांणां मुक्तिः अविद्याकार्यनाशन, यदा भगवान् आत्मरतीच्छुः भवति । तदा भगवान् अविद्या - कार्यंरूप संसारं सर्वत्र स्थितं स्वयमेव जीवकृतसाधनानपेक्षो नाशयति । तदा तेषां आसुराणां सर्वदोषनाशात् पुनः शुद्धत्वं सम्पाद्यते भगवता।[29] तत्र सर्वत्र जडजीवात्मके प्रपञ्चे तिरोधानकृत - वैजायनाशार्थं चिदानन्दौ प्रकटयति, तदा पूर्वोक्तजीवेष्वपि अंशद्वयस्य[30] प्राकट्यम् । चिदानन्दांशतिरोधानेन प्रकटित जीवात्मकप्रपञ्चे पुनः तदंशयोः प्रादुर्भावे महाप्रलयः। ततः प्रपञ्चो भगवति लीयते, तदा एक एव भगवान्, अक्षरस्वरूपेण पुरुषोत्तमाभिन्नतया तिष्ठति। श्रीमद्भागवते एवं स्मर्यमाणं विद्यते-

**अहमेवासमेवाग्रे नान्यद् यत् सदसत् परं।**
**पश्चादहं यदेतच्च योऽवशिष्यते सोऽस्म्यहम् ॥[31]**

अर्थात् यत्किमपि प्रतीयते यद्वा तिष्ठति यत् किमपि वाऽवशिष्यते तत् किं स्वयं भगवान् इति चेत् - सत्यम्। भगवतः महाप्रलयस्वरूपं तस्य कैवल्यैकरूपत्वम्। यदुक्तं दशमे –

**नष्टे लोके द्विपरार्द्धावसाने-**
**महाभूतेष्वादिभूतं गतेषु।**
**व्यक्तेऽव्यक्तं कालवेगेन याते-**
**भवानेकः शिष्यते शेषसंज्ञः ॥[32]**

विषयमेतत् आचार्यबल्लभेन सुबोधिन्यीटीकायां प्रर्य्यालोच्यते यत् योऽवशिष्यते सोऽस्म्यहम् इत्यत्र उद्भूतस्य सर्वस्य तिरोभावप्रापणे यत्तीरोभूतं न भवति, तिरोभावस्तदाश्रयो वा, अंशभेदेन वा तदपि अहमस्मि इत्यनेन सर्वा क्रियाः तद्विषयाश्चाहमिति ज्ञापयति ।[33] महाप्रलयस्य स्वरूपं बल्लभाचार्येण तत्त्वार्थदीपनिबन्धस्य शास्त्रार्थप्रकरणे स्पष्टीकृतम्। यथा –

**संसारस्य लयो मुक्तौ,न प्रपञ्चस्य कर्हिचित्।**
**कृष्णस्यात्मरतौ तस्य लयः सर्वसुखावहः ॥[34]**

श्लोकेऽस्मिन् सर्वसुखावहेति विशेषणेन सर्वेषां सुखप्रदातृरूपेण प्रपञ्चस्य विलयः भगवति। यथा सर्वेषां जीवानां सुखावहार्थं विश्रामनिमित्तं वा रात्रिं विरचितवान्, तथा आत्मरमणेच्छया स्वयं भगवान् जीवानां सुखोत्पत्तये प्रपञ्चस्य विलयं रचयति।

संसारस्य लयो मुक्तौ इति उपक्रम्यउत्पत्ति-प्रलययोः प्रदर्शनं कृतम्। मुक्त्यर्थं संसारस्य विलयो न पुनः प्रपञ्चस्य। तस्य भगवत्स्वरूपत्वात्। यदा परस्यात्मनः स्वरतीच्छा, तदानीं सः प्रपञ्चस्वरूपं स्वस्मिन् विलाप्य रमते । जीवानां सुखार्थं प्रलयं करोति, यथा भगवान् रात्रिं प्रकटयति।[35] वल्लभाचार्यप्रतिपादितप्रकारेण -

**जीवविभाजनं अधोदेशे सारणीरूपेण प्रदर्श्यते।**




**इत्येवं निरूपितं जीवस्य प्रकारवैभिन्न्यमिति दिक्।**

## References


1. सर्व. द. सं. पृ. ७२६।
2. श्री. भ. गी. -१५/ १६,९७,१८
3. यथाग्नेः क्षुद्राः विस्फुलिङ्गा व्युच्चरन्ति (बा.कृ.ग्र. पृ. १३)।
4. बृह. उप. २/१/२०।
5. श्री. भा. १०/२७/४।
6. श्री.भा. ४/३/२३।
7. सुवोधिनी: १०/२४/४।
8. ब्र. सू. २/३/१६ अ. भा.।
9. श्री. भ. गी. २/२०।
10. श्री.भा. १०/८७/२०।
11. छा.उप. ३/१४/१।
12. श्री. भा. १०/७५/४।
13. ब्र.सु. ३/२/५ (अ.भा)
14. वा.कृ. ग्र. प्र. र. श्याममनोहर.पृ. १४
15. श्री. भा. गो. अ.१६/५
16. श्री. भा. ११/११/४
17. तत्त्व. नि.शा.प्र.का. २३।
18. श्री. भा. १०/३९/५५
19. तत्ता. दी. नि. शा.प्र.का. ४५/४६ पृ८७/८८।
20. तत्ता. दी. नि. शा.प्र.का. पृ. ८७।
21. दासभूताः स्वतः इत्यात्मनः परमात्मनः।
    नान्यथा लक्षणं तेषां बन्धे मोक्षे च विद्यते॥
22. तत्ता. दी. नि. शा.प्र.का. ४५/४६, पृ. १५।
23. पुष्टिप्र. १२।
24. पुष्टिप्र. ११।
25. श्री.भ.गी.अ.१६/१९।
26. श्री.भ.गी.अ.१६/२०।
27. श्री.भ.गी.अ.१८/५५।
28. वालकृष्ण ग्र.पृ. १६।
29. वालकृ. ग्र. पृ. १६।
30. वालकृ. ग्र. पृ. १६।
31. श्री.भा. २/९/३२।
32. श्री. भा. १०/३/२५।
33. सुबोधिनी २/९/३२।
34. तत्त्वार्थः दी. नि. शा. प्र. का. २४।
35. त. दी.नि. शा.प्र. का. २४,पृ ८४-८५,